संस्कृतवार्ता:

23-07-2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· वित्तमन्त्री निर्मला सीतारामन् इत्येषा संसदि एनडीएप्रशासनस्य तृतीयकार्यकालस्य प्रथमं केन्द्रीयवित्तसंकल्पनापत्रकं प्रस्तुतवती।

· प्रख्यापिते वित्तसंकल्पनापत्रके द्विलक्षकोटिरूप्यकाणां परिव्ययेन सह पञ्च वर्षाणाम् अवधौ चतु: कोट्यधिकेभ्यः युवभ्यः कौशलवृत्यवसरौ संवर्धयितुं पञ्च योजनानाम् उपक्रमाणाञ्च प्रधानमन्त्रिणः संग्रहणस्य घोषणा जाता ।

· प्रशासनेन आयकरमानेषु संशोधनं विहितम् , वेतनभोग्यकर्मचारिणां कृते मानकव्यवकलनं पंचाशत् सहस्ररूप्यकात् पञ्चसप्तति-सहस्ररूप्यकाणि यावत् वर्धितम्।

· वैदेशिकमूलधनम् आक्रष्टुं वैदेशिकोद्यमेषु निगमकरस्य मूल्यम् चत्वारिंशत् प्रतिशतात् पञ्चत्रिंशत् प्रतिशतं यावत् न्यूनीकृतम्।

· महिलानेतृत्वविकासयोजनानां कृते त्रिलक्षकोटिरूप्यकाणाम् आवण्टनमपि जातम्।

· महिलाक्रिकेट्-क्रीडायाम् अद्य सायंकाले श्रीलङ्कादेशस्य दाम्बुलानगरे भारतीयदलं नेपालदलं सम्मुखीकरिष्यति।

<u>केन्द्रीयायव्ययसङ्कल्पनापत्रं</u>

वित्तमन्त्रीनिर्मलासीतारमन् इत्येषा अद्य लोकसभायां चतुर्विंशत्यधिक-पञ्चविंशत्यधिक-द्विसहस्रतमवर्षयो: सामान्यं वित्त-सङ्कल्पना-पत्रकं प्रस्तुतवती। इदं नरेन्द्रमोदि-प्रशासनस्य तृतीयकार्यकालस्य प्रथमं पूर्णं वित्तसङ्कल्पना पत्रमस्ति। लोकसभायां केन्द्रीय-वित्तसङ्कल्पना-पत्रकं सम्मुखीकुर्वती वित्तमन्त्री प्रोक्तवती यत् वैश्विकप्रतिकूल-परिस्थिते: अनन्तरमपि भारतीयार्थव्यवस्था शीर्षस्तरं भजते।

वित्तमत्री प्रोक्तवती यत् इदं पत्रकं मुख्यतया वृत्ति-कौशल-सूक्ष्मलघुमध्यमोद्योग-मध्यमवर्गेषु केन्द्रितं वर्तते। यतोहि द्विलक्षकोटिरूप्यकाणां परिव्ययेन सह पञ्चवर्षाणाम् अवधौ चतु:कोटि-युवभ्य: पञ्च प्रधानमन्त्रिण: योजनानां पदक्षेपाणाञ्च सङ्ग्रहणस्य घोषणापि जाता। पत्रके एतस्मिन् विकसितभारताय एकां विस्तृत-संरचनां प्रख्यापयन्ती सर्वेभ्य: अवसरप्रदातु: प्रशासनस्य नव-प्राथमिकता: अपि उल्लिखिता:। एतासु प्राथमिकतासु कृषि-वृत्यवसर-कौशल-समावेशि-मानवसंसाधनविकास-सामाजिकन्याय-विनिर्माण-सेवा-नगरीयविकासोर्जा-सुरक्षा-आधारभूतसंरचना- नवाचारानुसन्धान-विकास-इत्यादय: समाविष्टास्सन्ति। वित्तमन्त्रिणा नवीनकरव्यवस्थाया: अन्तर्गतं आयप्राप्तकर्मचारिभ्य: आयकरे मानकव्यवकलनं पञ्चाशत्सहस्ररुप्यकेभ्य: संवर्ध्य पञ्चसप्ततिसहस्ररुप्यकाणि यावत् कृतम्। एवमेव निवर्तिवेतन-भोक्तृभ्य: पारिवारिक-वार्षिक वृत्तौ व्यवकलनं पञ्चदशसहस्ररुप्यकेभ्य: पञ्चविंशतिसहस्ररुप्यकाणि यावत् कृतम्। अनेन भूयोऽपि चुत:कोटि वेतनभोगिकर्मिण: निवर्तिवेतनधारकाश्च लाभान्विता: भविष्यन्ति। एददितिरिच्य प्रशासनेन नवीनकरव्यवस्थां प्राप्तकर्तृभ्य: कर-निक्षेप-संरचनायामपि संशोधनं कृतम्। वित्तमन्त्री अस्माकं विकास-आवश्यकताभ्य: वैदेशिक-मूलधनम् आक्रष्टुं वैदेशिकोद्यमेषु निगमितकरस्य मानं चत्वारिंशत् प्रतिशतत: न्यूनीकृत्वा पञ्चत्रिंशत्प्रतिशत-पर्यन्तं कृतवती। प्रशासनेन भारतीयनवाचारं सदृढीकर्तुम् अपि च उद्यमशीलताया: भावं वर्धयितुं सर्वेषां वर्गाणां निवेशकेभ्य: प्रसिद्ध: एंजेलकर: निस्सारित:। एतददितिरिच्य प्रशानेन एकषष्ट्यधिक-नवदशशततमस्य आयकराधिनियमस्यापि व्यापकी समीक्षा करिष्यते इत्यस्यापि घोषणा कृता। अवधेयं वर्तते यत् अस्य वर्षस्य वित्तसङ्कल्पनापत्रे कृषिसम्बद्धेभ्य: क्षेत्रेभ्य: सार्धैकलक्षकोटि-रुप्यकाणां प्रावधानमपि अस्ति।

<u>प्रधानमन्त्री -प्रतिक्रिया</u>

प्रधानन्त्री नरेन्द्रमोदी अद्य केन्द्रीय-वित्त-सङ्कल्पनापत्रकं प्रशंसितवान्। एकस्मिन् दृश्याङ्कन-सन्देशे प्रधानमन्त्रिणा उक्तं यत् अनेन वित्तसङ्कल्पनापत्रकेण समाजस्य प्रत्येक: वर्ग: लाभान्वितो भविष्यति। प्रधानमन्त्रिणा कथितं यत् इदं पत्रकं विकासशीलभारताय अस्ति यत् समावेशिविकासं सुनिश्चितं करोति, समाजस्य सर्वेभ्य: वर्गेभ्य: हितकरं वर्तते तथा च विकसितभारताय मार्गं प्रशस्तीकरोति। तेनोक्तं यत् प्रशासनेन वृत्ति-सम्बद्ध-प्रोत्साहन-योजनाया: घोषणा कृता, यया देशे कोटिश: नूतना: वृत्यवसरा: सृजिता: भविष्यन्ति।

बजट-प्रतिक्रिया

टीडीपी-दलस्य नेता केन्द्रीय-नागरिकोड्डुयनमन्त्री किञ्जरपु-राम-मोहन-नायडू: केन्द्रीय-वित्तसङ्कल्पनापत्रकं प्रशंसितवान् उक्तवान् च यत् आन्ध्रप्रदेश-पोलावरम- परियोजनाया: विकासाय महत्वपूर्ण-प्रावधानानां घोषणा जाता। अनन्तरं संसद्-भवन-परिसरे वार्ताहरै: सह संवादं कुर्वन् असौ उक्तवान् यत् पोलावरम-परियोजना राज्यस्य जनेभ्य: जीवनरेखा वर्तते। केन्द्रीय-संसदीय-कार्यमन्त्री किरेन-रिजिजू: अभिव्यक्तवान् यत् केन्द्रीय-वित्त-सङ्कल्पनापत्रकं सर्वेभ्य: नागरिकेभ्य: स्वप्नसदृशं वर्तते। अद्य संसद्-भवन-परिसरे वार्ताहरै: सह संवादं कुर्वन् कथितवान् यत् इदं विकासोन्मुखी- वित्तसङ्कल्पनापत्रकं वर्तते यत् समाजस्य प्रत्येकस्मिन् वर्गे केन्द्रितो वर्तते।

वित्तसङ्कल्पनापत्रम्

उद्योगै: केन्द्रीय-वित्तसङ्कल्पनापत्रस्य स्वागतं व्यवहृतम्। नवदिल्ल्यां वार्ताहरै: सह सम्भाषमाण: फिक्की इत्यस्य अध्यक्ष: अनीशशाह: अस्य पत्रकस्य प्रशंसां कृतवान्। असौ कथितवान् यत् इदं सङ्कल्पनापत्रकं विकासोन्मुखी वर्तते यत् युवभ्य: महिलाभ्य: कृषकेभ्यश्च अस्ति। एकस्य उद्यमस्य निर्माता प्रबन्धनिदेशकश्च गौरवभगत: अभिव्यक्तवान् यत् सुवर्ण-रजत-धातुषु सीमशुल्के व्यवकलनं कस्मैश्चिदपि उद्योगाय हितकरं वर्तते। फिक्की इत्येतस्य पूर्वाध्यक्षा एकस्य चिकित्सालयसमूहस्य प्रबन्धनिदेशिका च संगीतारेड्डी प्रोदीरितवती यत् विकासेन सह एतस्मिन् सङ्कल्पनापत्रके महिलाभ्य: युवभ्य: ध्यानं प्रदत्तम्।

काङ्ग्रेस - प्रतिक्रिया

काङ्ग्रेसदलेन वित्त-सङ्कल्पना-पत्रकस्य आलोचना कुर्वता नैराश्यं प्रकटितम्। अनेन दलेन उक्तं यत् अस्मिन् पत्रकं आयवैषम्यं न उल्लिखितम्। सांसद: शशि: थरूर: उक्तवान् यत् वित्तसङ्कल्पनापत्रके मनरेगा इत्येतस्या: योजनाया: अपि उल्लेख: न वर्तते। समाजवादी-दलस्य प्रमुख: अखिलेश-यादव: अपि केन्द्रीय-वित्त-सङ्कल्पना-पत्रकस्य आलोचनां कृत्वा उक्तवान् यत् अस्मिन् महार्घताया: समस्याया: वृत्यभाव -सम्बद्ध-विषयस्य च समाधानं न वर्तते। तेनोक्तं यत् यावत् पर्यन्तं कृषकाणां समस्यानां समाधानं न भविष्यति अथ युवकेभ्य: वृत्तीनां सुव्यवस्था च न भविष्यति, तावत् पर्यन्तं जनेभ्य: लाभ: न भविष्यति।

## महिला-क्रिकेट

महिला-एशिया-चषक-क्रिकेट्-प्रतिस्पर्धायाम् अद्य सायं श्रीलङ्कायाः दाम्बुलायां 'अ' वर्गस्य द्वन्द्वे भारतीयदलं नेपालदलं सम्मुखी-करिष्यति। स्पर्धा सायं सप्तवादने आरप्स्यते। भारतीयदलम् अधुना 'अ' वर्गस्य अङ्कतालिकायां शीर्षस्थाने वर्तते। अथ च साम्प्रतं यावत् सततं विजयं अधिगतवत्। हरमनप्रीत-कौर इत्येतस्याः नेतृत्वे भारतीय-महिला-दलेन पाकिस्तानेन संयुक्तारबामीरातेन च सह स्पर्धायां विजयः अधिगतः।

।। इति वार्ता: ।।